तर्पणनिषेधो यथा "दर्शश्राद्धं गयाश्राद्धं तिलैस्तर्पणमेव च । न जीवत्पितृको भूप ! कुर्य्यात् कृत्वाघमाप्नुयात्" कालिका० पु० ८८ अ० ।

कर्त्तरि ल्यु । ५तृप्तिकारके त्रि० । "सुरभिर्घ्राणतर्पणः" अमरः । "सत्तर्पणो नाकसदां वरेण्यः" भट्टिः ।

**तर्पणी** स्त्री तृप–णिच्–करणे ल्युट् ङीप् । गुरुस्कन्दवृक्षे शब्दमा० ।

**तर्पणेच्छु** पु० तर्पणमिच्छति इष उ० नि० २त० । १भीष्मे शब्दर० । २तर्पणेच्छुमात्रे त्रि० ।

**तर्पिन्** त्रि० तृप–णिच्–णिनि । १तर्पके प्रीणयितरि स्त्रियां ङीप् सा च २पद्मचारिणीलतायाम् स्त्री शब्दच० ।

**तर्पिली** स्त्री तृप–बा० इल गौरा० ङीष् । पद्मचारिण्याम् । कपिलका० रस्य वा लः । तल्पिलीत्यप्यत्र तत्रार्थे । स्वार्थे क । तर्पिलिका तत्रार्थे । तत्रापि वा रस्य लः । तल्पिलिकापि तत्रार्थे ।

**तर्ब** गतौ भ्वा० पर० सक० सेट् । तर्बति अतर्बीत् । ततर्ब ।

**तर्बट** पु० तर्बति सततं गच्छति तर्ब–अटन् । १वत्सरे २चक्रमर्दवृक्षे च राजनि० ।

**तर्म्मन्** न० तॄ–मनिन् । यूपाग्रभागे अमरः ।

**तर्य** पु० ऋषिभेदे । "सदापृणो यजते वि द्विषो वधीद्बाहुवृक्तः श्रुतवित्तर्य्यः" ऋ० ५।४४।१२ "सदापृणादयः पञ्चर्षयः" इति भाष्योक्तेः ।

**तर्ष** पु० तृष–भावे घञ् । १अभिलाषे २तृष्णायाञ्च अमरः । "निवृत्ततर्षैरुपगीयमानात्" भाग०१।८ तर्षच्छेदो न भवति पुरुषस्येह कल्मषात् । निवर्त्तते तदा तर्षः पापमन्तर्गतं यदा" भा० शा० २०४ अ० । तॄ–कर्मणि करणे–वा स । ३समुद्रे ४भेलके च उज्ज्वल० ।

**तर्षण** न० तृष–भावे ल्युट् । पिपासायां जटाधरः । [त्रिका० ।

**तर्षित** त्रि० तर्षो जातोऽस्य तार० इतच् । तृषिते पिपासौ

**तर्षुल** त्रि० तृष–बा० उलच् । तृष्णायुक्ते "ज्ञानेन्द्रियाणीन्द्रियार्थान् नोपसर्पन्त्यतर्षुलम्" भा० २१२ अ० ।

**तर्ष्यावत्** त्रि० तृषावत् वेदे पृषो० । तृष्णायुक्ते । "निरुद्धचिन्नश्चिपस्तर्ष्यावान् गोधा" १०।२८।१० "तर्ष्यावान् तृषावान्" भा० ।

**तर्हि** अव्य० तद्+र्हिल् । तस्मिन् काले इत्यर्थे । "रक्षांसि वा एनं तत्रोलभन्ते यर्हि न जायते" ऐत० ब्रा० । "यर्हि वाव वो मयार्थो भविता तर्ह्येव वोऽहं पुनरागन्तास्मि" तै० स० ।

**तल** प्रतिष्ठायां वा चुरा० उभ० पक्षे भ्वा० पर० अक० सेट् । तालयति ते तलति । अतीतलत् त अतालीत् । तालयाम् बभूव आस चकार । ततल तेलतुः तेलुः ।

**तल** पु०न० तल–अच् । स्वरूपे "शैलेयनद्धेषु शिलातलेषु" कुमा० । "हिमधाम्नि दर्पणतले च सुरुः" माघः । "विद्याङ्कुर्वन्तु महतस्तलं विद्विषदम्भसः" "तलं स्वरूपं प्रमाणं वेति" मल्लिना० । २व्याघातवारणे । ३कानने ४कार्य्यवीजे न० मेदि० । ५गर्त्ते पु०त्रिका० । ६पादतलस्य मध्ये हेमच० । "इदं रसातलं नाम सप्तमं पृथिवीतलम्" भा० वि० ३६० अ० । "अवस्तलमिव व्योम कुर्वन् व्योमेव भूतलम्" रघुः । ७तालवृक्षे पु० ८चपेटे (चड़) ९त्सरौ १०खड्गमुष्टौ ११सव्यहस्तेन तन्त्रीवादने पु० मेदि० । १२गोधायां पु० हेमच० ।

**तलक** न० तल–बा०वुन् । पुष्करिण्याम् (तलाओ) हारा० ।

**तलकीट** पु० कृमिभेदे "तलकीटस्य वीजेषु पचेदुत्कारिकां शुभाम्" सुश्रुते श्वासचिकित्सायाम् ।

**तलताल** पु० तलेन करतलेन ताड्यते ताड–कर्मणि घञ् डस्य लः । करतलेन वादनीये वाद्यभेदे "आस्फोटयन् खेलयंश्च तलतालं च वादयन्" भा० व० १७८ अ० ।

**तलत्राण** न० तलं करतलं त्रायते त्रै–ल्यु करणे ल्युट् वा । करतलत्राणकारके करतलरक्षके चर्ममये गोधाभेदे "यत्तैते सतलत्राणाः सुयोधनपुरोगमाः" भा० द्रो०११६ अ० । "विबद्धासितलत्राणः क्षात्रधर्ममनुव्रतः" भा० व० ६७ अ० ।

**तलप्रहार** पु०तलेन चपेटेन प्रहारः प्र+हृ-घञ् ३त०।(चापड़-मारा) चपेटाघाते । "तलप्रहारमशनेः सदृशं भीमनिःस्वनम्" रामा० ल० ७६ अ० । [तलमीने अमरे पाठान्तरम् ।

**तलमीन** पु० तले जलनिम्ने स्थितो मीनः । (चिङ्गुड़ि)

**तलयुद्ध** न० तलस्य चपेटस्याघातेन युद्धम् । चपेटाघातेन युद्धे (चड़ाचड़ि) "बालानां तलयुद्धे संग्रामः सतयुद्धे वा" वृ० स० ४७अ० तलशब्दे इति पाठान्तरम् ।

**तललोक** पु०तलस्थो निम्नस्थः भूमिस्तलस्थो लोकः । पाताले "स्वर्लोकपालान् खगलोकपालान् लोकपालांस्तललोकपालान्" भाग० २।४६।४३ अ० ।

**तलव** त्रि० तलं हस्तादितलं वाति निहन्ति ताड़यति वा–गतिहिंसनयोः क । तलवाद्यवादके । "तान्त्रायानन्दाय तलवम्" यजु० ३०।२० । "तलवं तलवाद्यवादनम्" वेददी० ।